# shAradAstutiH

# શારદાસ્તુતિઃ

## Document Information

Text title : shAradAstutiH 4

File name : shAradAstuti.itx

Category : devii, sarasvatI, devI

Location : doc_devii

Author : Kukke. Subrahmanyashastri

Transliterated by : DPD

Proofread by : DPD

Description/comments : From Maharaja Sanskrit Mahapathashala patrika p. 39-44

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

shAradAstutiH

# શારદાસ્તુતિઃ

શ્રીશારદામ્બાયૈ નમઃ ।

કલ્યાણમૂર્તિઃ કરુણાલવાલા કલાધરોત્તંસકિરીટકોટિઃ ।
કલાવતી કાઙ્ક્ષિતકલ્પવલ્લી કરોતુ કલ્યાણપરમ્પરાં નઃ ॥ ૧॥

ચક્રીકૃતોલ્લોચશિરઃફણીન્દ્રફણામણીભાસુરતૂલિકાઢ્યે ।
શ્રીમંટપાન્તર્મૃગરાજપીઠે વિદ્યોતતે નઃ કુલભાગધેયમ્ ॥ ૨॥

જ્ઞેયં મુનીન્દ્રૈશ્ચિરયોગસિદ્ધૈસ્સવિન્મયં તત્પરદેવતાયાઃ ।
લીલાગૃહિતં યદુપાસકાનાં ધ્યયોપલબ્ધ્યૈ વિવૃણોમિ રૂપમ્ ॥ ૩॥

શ ૃણોમિ વાચં યદિ લોચનેન પશ્યામિ ચેત્પાદતલેન રૂપમ્ ।
પાસ્યામિ ચેદઞ્જલિના મહાબ્ધિં કલ્પેય દેવ્યા ગુણવર્ણનાય ॥ ૪॥

તથાપિ વાચંયમસાર્વભૌમકૃપાલવાલાપ્તવચોભિરમ્બામ્ ।
સ્તોષ્યામિ કિઞ્ચિત્પ્રતિભાતદૃષ્ટશ્રુતાનુભૂતોરુગુણપ્રવાહૈઃ ॥ ૫॥

રત્નાવજીકર્બુરિતેન્દુરેખાપરિષ્કૃતાનર્ઘ્યકિરીટકોટિમ્ ।
લાવણ્યવાપીપુલિનાયમા ન લલાટખેલચ્ચિકુરાલિચક્રામ્ ॥ ૬॥

ઉન્નિદ્રચામ્પેયપરાગગન્ધિ મધુવ્રતશ્રીમદરાલકેશીમ્ ।
ભોગીન્દ્રભોગોપમનીલવેણી વિષક્તચૂડામણિનાગપાલીમ્ ॥ ૭॥

લાવણ્યકુલ્યાયિતશોણકાન્તિ સીમન્તરેખાગ્રચલલ્લલન્તીમ્ ।
ભ્રૂચાપસંયોજિતમારબાણનિભાક્ષિલક્ષીકૃતધાતૃવક્ત્રામ્ ॥ ૮॥

પ્રવર્ષ્ઠકામ્ભોધરકીર્યમાણવર્ષોપલસ્પર્ધિકટાક્ષવીક્ષામ્ ।
હીરપ્રભાભાસુરચમ્પકાભનાસાગ્રવિસ્ફારિમણિપ્રવેકામ્ ॥ ૯॥

વિકસ્વરામ્ભોરુહકેસરાભરદાંશુસન્મિશ્રિતમુગ્ધહાસામ્ ।
રદચ્છદાપાટલકુન્દકોશમાલા પ્રતિસ્પર્ધિશિતાગ્રદન્તામ્ ॥ ૧૦॥

વર્ણાવલીવાદનશોણરત્ન કોણાયમાનાગ્રવિલોલજિહ્વામ્ ।

કપોલપાલીમણિદર્પણાન્તઃ સ્ફુરત્પ્રભાવિમ્બિતકર્ણપૂરામ્ ॥ ૧૧॥

વિસૃત્વરસ્મેરમુખેન્દુબિમ્બ જ્યોત્સ્નાસુધાપીનજગચ્ચકોરામ્ ।
વિપઞ્ચિકાઞ્ચત્કલનાદભઙ્ગી વિભાવનામોદવિલોલવક્ત્રામ્ ॥ ૧૨॥

વક્રાબ્જનાલપ્રતિમાન કણ્ઠમૃણાલ કાણ્ડાયિત હરિહારામ્ ।
રેખાત્રયીસૂચિત ભર્તૃભાગ્યમાઙ્ગલ્ય સૂત્રાઞ્ચિત કમ્બુકણ્ઠીમ્ ॥ ૧૩॥

ઓષ્ઠપ્રભાલક્તકરૂષિત શ્રીકૌશેયકૂર્પાસપિનદ્ધવક્ષામ્ ।
સુવૃત્તમુક્તાવલિ કાઙ્ક્ષ્યમાણસ્તન્યામૃતાપીન કુચાબ્જકોશામ્ ॥ ૧૪॥

ચિરાગતાનેક સુતાવલોક સ્નુતસ્તન ક્ષીરકણાર્દ્રહારામ્ ।
અભષ્ટિદાન પ્રથિતામરદ્રુ શાખાયમાનાં સલબાહુપાશામ્ ॥ ૧૫॥

શાણોપલોલ્લીઢ મણિપ્રવેક કેયૂરવલ્લીવલયાઙ્ગુલીયામ્ ।
પ્રપન્નલોકાભયદાન મુદ્રાપુસ્તાક્ષમાલાં કુશપાશહસ્તામ્ ॥ ૧૬॥

વૈડૂર્યશોણોપલહીર નીલપ્રત્યુપ્ત હેમાઙ્ગદકઙ્કણાઢ્યામ્ ।
તાટઙ્કુ શોણોપલ બીજપૂર બીજભ્રમોત્કણ્ઠકરાગ્રકીરામ્ ॥ ૧૭॥

આપીનવક્ષોરુહભાર ભુગ્નવલિત્રયીપાત પિનદ્ધમધ્યામ્ ।
સુવર્ણ કાઞ્ચીમણિસૂત્રનદ્ધસ્પર્શાનુમેયામ્બરગૂઢગચ્છામ્ ॥ ૧૮॥

રત્ન પ્રવેકાઞ્ચિતનૂપુરાગ્ર મણિપ્રભાપિઞ્જર પાદપદ્મામ્ ।
શરત્પ્રસન્નેન્દુ કલાભિરામ નખાંશુવિદ્રાવિતહાર્દતાપામ્ ॥ ૧૯॥

પ્રતપ્તજામ્બૂનદ કાયકાન્તિચ્છટાપિ શઙ્ગીકૃતસૌધમાલામ્ ।
શ઼ૃત્યન્ત સીમાન્ત વિભાગ રેખાપ્રમાણદણ્ડાયિતગાત્રયષ્ટિમ્ ॥ ૨૦॥

શીતાંશુતારાલિ તુષારહીર નિભોત્તરાસઙ્ગસમૃદ્ધશોભામ્ ।
સર્વજ્ઞતાધ્યાપન લબ્ધવર્ણપ્રસાદદાના દૃતપક્ષ્યલાક્ષિ ॥ ૨૧॥

જગત્રયાપત્યસપીતિ મોદપર્યાસવક્ષોરુહ પૂર્ણકુમ્ભામ્ ।
લોકત્રયી સંવનનપ્રયુક્ત યન્ત્રોપમાસચેનવક્ત્રબિમ્બામ્ ॥ ૨૨॥

સાંસિદ્ધિકાગન્તુક કાન્તિપૂરતરઙ્ગરિઙ્ગત્તરલાગશોભામ્ ।
નિજાઙ્ગ સંસર્ગવિશેષરમ્યદુકૂલ રત્નાભરણ પ્રસૂનામ્ ॥ ૨૩॥

પૂર્ણેન્દુ કલ્લોલિતદુગ્ધ સિન્ધુફેનાયમાનામ્બવર સંવૃતાઙ્ગી ।
ભેદભ્રમોન્મૂલનદક્ષતત્વ વિજ્ઞાનમુદ્રાઞ્ચિતપાણિપદ્મામ્ ॥ ૨૪॥

મૃણાલસૂત્રીવિશદોપવીત મુક્તાક્ષમાલાકનકાલુરમ્યામ્ ।
ભ્રૂવલ્લરીકોમલરુન્દકલ્પ કાશ્મીરપઙ્કાર્દ્રતમાલપત્રામ્ ॥ ૨૫॥

સિન્દૂરપાલી સુષુમાનુષઙ્ગ કિમ્મીરકાલાગરુચૈત્રકાઢ્યામ્ ।
વિરઞ્ચિનેત્રાષ્ટકપીયમાન સૌન્દર્યપીયૂષમુખેન્દુલક્ષ્મીમ્ ॥ ૨૬॥

ધ્યાનાયન યચ્ચજગદ્ગુરૂણા ક્ષેમાયનં ભક્તિપરાયણાનામ્ ।
રસાયનં ધાતૃવિલોચનાનામેકાયનં નશ્શરણાગતાનામ્ ॥ ૨૭॥

ભક્તાવલીમાનસરાજહંસી શ્રીચક્રરાજાશ્રિતદિવ્યમૂર્તિમ્ ।
શ્રીશ ૃઙ્ગશૈલેન્દ્રવિહારલોલાં શ્રીશારદામ્બાં સતતં સ્મરામિ ॥ ૨૮॥

શ્રીહરીમતીમન્દવખણ્ડચૂડઃ દયારસલ્લિન્નવિલોચનાન્તામ્ ।
ચકોરસાહિત્યનિદાનવક્ત્રાં સ્મરામિ ભક્તેષ્ટદકલ્પવલ્લીમ્ ॥ ૨૯॥

તાલીપલાશાઞ્ચિતકર્ણજાહા કાશ્મીરરેખોજ્જ્વલફાલમૂલા ।
નિશાહ્વયાચૂર્ણવિમૃષ્ટગણ્ડા ધાતુઃપુરન્ધ્રી હૃદિ સન્નિધત્તામ્ ॥ ૩૦॥

પ્રતિષ્ઠિતાં શ્રીગુરુશઙ્કરાર્યૈઃ સમર્ચિતા સંયમિસાર્વભૌમૈઃ ।
તપોભિરેષાં સુસમિદ્ધશક્તિં સ્થાને શ્રુતિસ્ત્વાં ગુરુમૂર્તિમાહ ॥ ૩૧॥

નારાયણોરસ્થલગેહિનીતિ વિરિઞ્ચિવક્રાબ્જકુટુમ્બિનીતિ ।
શ્રીકણ્ઠવામાઙ્ગવશંવદેતિ યથાભિલાષં સમુપાસતે ત્વામ્ ॥ ૩૨॥

શ્રુત્વા સ્વરાસિ પ્રકૃતિઃ પદેષુ વાક્યેષુ હેતુઃ પ્રમિતિઃ પ્રમાણે ।
ક્રિયાફલા તત્પ્રતિભૂસ્ત્વમેવ સર્વાત્મના વ્યાપ્ય વિભાસિ વિશ્વમ્ ॥ ૩૩॥

કલ્યા પ્રદુગ્ધે ચતુરઃ પુમર્થાન્ હિંસા ચ ઘોરા મુષતી વિધત્તે ।
શક્તિદ્વયી તેઽમ્બ નિસર્ગસિદ્ધા નવામ્બુદસ્યેવ સુવૃષ્ટિવજ્રે ॥ ૩૪॥

યા તે પ્રતિષ્ઠેતિ કલા પ્રસિદ્ધા ભૂમૌ યયા વ્યાપ્તમિદં સમગ્રમ્ ।
તયૈકયા વિશ્વમિદં બિભર્ષિ વિશ્વમ્ભરાં ત્વાં હૃદિ ભાવયામિ ॥ ૩૫॥

માતશ્ચતુષ્ષષ્ટિકલાભિરેતચ્ચરાચરં વિશ્વમનુપ્રવિશ્ય ।
ત્વમેવ તચ્ચેતયસીહ સર્વચૈતન્યરૂપાં શરણં પ્રપદ્યે ॥ ૩૬॥

વિદ્યેત્યવિદ્યેતિ ચ યત્સ્વરૂપે મોક્ષાય બન્ધાય ચ હેતુભૂતે ।
લીલા તવૈવામ્બ નચેત્કુતાવો તમઃપ્રકાશૌ સહયોગિનૌ સ્તઃ ॥ ૩૭॥

યાશ્શક્તયસ્સર્ગવિધૌ વિધાતુરુચ્ચાવચાઃ કારણતાં પ્રસન્નાઃ ।
તાસાં પરાસાં ચ સમષ્ટિરૂપામમ્બામહં ભાવનયાઽવલમ્બે ॥ ૩૮॥

અવ્યાકૃતં પૂર્વમિદં સમગ્રં તત્તદ્વિશેષગ્રહણાય નામ્ના ।
તદ્વ્યાકરોસ્ત્વં વચસાં સવિત્રિ તત્ત્વાં વિના ચેતયતે ન કિઞ્ચિત્ ॥ ૩૯॥

ઋચા નુવાકેન ચ સામશસ્ત્રૈર્વિધિપ્રયોગાન્ વિવિધાન્વિધાય ।
દદાસિ લોકદ્વયસૌખ્યમેષાં તાં વાઙ્ગમયીં શાન્તિકલામુપાસે ॥ ૪૦॥

સુધાસવર્ણાં તરુણારુણાભામારાધ્ય કેચિદ્વૃણુતે સ્વકામાન્ ।
જુષન્તિ ભોગાન્વિહિતાન્ ત્વયૈવ તે વઞ્ચિતાસ્ત્વન્મહિમાનભિજ્ઞાઃ ॥ ૪૧॥

સંવિન્મયીં ત્વાં સમુપાસતે યે સંવિત્સ્વરૂપાઃ ખલુ તે ભવન્તિ ।
શ્રદ્ધામયોયં પુરુષશ્રુતશ્ચ કીટોઽપિ પેશસ્કરતાં પ્રયાતિ ॥ ૪૨॥

સેવાલસોહં ન ચ કામકામી સેવાર્થિની ત્વં નહિ પૂર્ણકામા ।
નૈવાવયોસ્સેવકસેવ્યભાવસ્તદ્ભેદહાનૌ કિમુશિષ્યતે સા ॥ ૪૩॥

બ્રહ્માહમસ્મીતિ નિદર્શયન્તુ ગવેષિતં તૈરપિ તાવદેવ ।
તસ્યાપિ ચૈતન્ય મુપાનયન્તી ચિદ્રૂપિણીં ત્વામહમિત્યવૈમિ ॥ ૪૪॥

દયામ્બુધિં ત્વાં જનનીતિ મત્વા વિધૂયગર્વાજ્જનનીતિમમ્બ ।
અત્યાચરં ધર્મપથં ચ મૂઢો મામુદ્ધરેતિ પ્રલપન્નલજ્જે ॥ ૪૫॥

ત્વત્પાદપઙ્કેરુહદાસમેનં નૈવપ્રતીકર્તુમલં સુરા વા ।
ઇતિ પ્રમત્તઃ કરવાણિ પાપં યશસ્ત્વકીયં પરિરક્ષ મા વા ॥ ૪૬॥

ન પ્રાર્થિતામેવ સુરરાજલક્ષ્મીર્નવાઞ્છિતં વા ભુવનાધિપત્યમ્ ।
ઇયન્મયા પ્રીયિતમેવ દેહિ તવામ્બ પાદામ્બુરુહસ્ય દાસ્યમ્ ॥ ૪૭॥

બાલસ્ય મૂકસ્ય જડસ્ય ચાપિ દયામ્બુરાશે દયસે ત્વમમ્બ ।
મામડેમૂકં સમુપેક્ષસે કિં વિશૃઙ્ખલા તે પ્રભુતા ધરિત્ર્યામ્ ॥ ૪૮॥

માતુર્દયાપાત્રમહં ભવેયં પરુત્પરાર્યૈષમ ઇત્યવેક્ષ્ય ।
ઇયન્તિ વર્ષાણ્યતિવાહિતાનિ ફલે વિલમ્બઃ કિમભાવવાદઃ ॥ ૪૯॥

અનુગ્રહં વા મયિ નિગ્રહં વા યત્કર્તુકામાસિ કુરુષ્વ તૂર્ણમ્ ।
દ્વયેપિ તસ્મિન્વિહિતે ત્વયૈકઃ સૂતેત્રિવર્ગન્ત્વપરોપવર્ગઃ ॥ ૫૦॥

ત્વય્યર્પિતે કર્મણિ તત્ફલે ચ માંમાવિકુર્યાદિતિ નિવ્વૃતેપિ ।
સા વાસના માં નજહાતિ કિં તત્ ત્વયા ગૃહીતન્નુ સમુજ્ઝિતં નુ ॥ ૫૧॥

ઉપાસનાભિર્દહરાત્મવિદ્યાવિશેષાવજ્ઞીનનિવર્તિતાભિઃ ।

પ્રીણાસિચેત્ત્વં તદબોધયન્ત્યા ત્વયૈવ માતર્નનુ વઞ્ચિતાસ્સ્મઃ ॥ ૫૨॥

ગુરૂપદેશૈર્નિગમાવબોધૈસ્સતાં ચરિત્રૈર્મનસઃ પ્રસાદૈઃ ।
નિશ્ચપ્રચન્તે કરુણામયી ત્વં કથં મૃષોદ્યં તદિતિ પ્રતીમઃ ॥ ૫૩॥

નાપેક્ષસે ત્વં વિધિવત્સપર્યાં ન યોગસિદ્ધિં ન દૃઢાં ચ ભક્તિમ્ ।
સકૃત્પ્રણામાઞ્જલિનૈવ તુષ્ટા તનોષિ કલ્યાણપરમ્પરાં નઃ ॥ ૫૪॥

સ્મૃતાપિ તાપત્રયદારિણીતિ કૃતાપરાધેપિ દયામયીતિ ।
મત્વા શરણ્યાં શરણાગતોહમીદૃગ્ગુણાન્યા ક્વ ચ વા વદાન્યા ॥ ૫૫॥

શોણાશ્મનીકાશતનુપ્રકાશાં વિકોશિતશ્યામકુશેશયાક્ષીમ્ ।
દિશામહેશાશ્રિતપાદદેશાં સ્મરામિ કામેશ્વરકોશનાથામ્ ॥ ૫૬॥

એણીનિભાક્ષીં કરુણામ્બુરાશિદ્રોણીકૃતાપાઙ્ગઝરીં પુરાણીમ્ ।
શ્રોણીતટાલમ્બિતચારુવેણીં વાણીં ભજે મોહલતાકૃપાણીમ્ ॥ ૫૭॥

વીટીરસાપાટલદન્તવાટી ચેટીકૃતાશેષસુપર્વકોટી ।
પાટીરગૌરા ત્રિજગન્નટીયમાટીકતાં ચેતસિ વાગ્વધૂટી ॥ ૫૮॥

કરાગ્રસંલાલિતરાજકીરાન્ પ્રાલમ્બિમુક્તાફલતારહારાન્ ।
ગિરાંવિદૂરાન્નિગમાન્તસારાન્ સમાશ્રયામો વિધિધર્મદારાન્ ॥ ૫૯॥

શ્રીશારદેતિ ચતુરાસ્યકુટુમ્બિનીતિ વાગ્વાદિનીતિ વરદેતિ ચ નામપઙ્ક્તૌ ।
એકૈકમેવ નિખિલાર્થકરં તદન્યદામ્રેડિતં હિ ચરિતાર્થપદેષુ રૂઢમ્ ॥ ૬૦॥

બાલાર્કપાટલમરીચલસદ્દુકૂલા લીલાસ્મિતદ્વિગુણમૌક્તિકરમ્યમાલામ્ ।
વેલાતિલઙ્ઘિતદયોર્મિલનેત્રખેલાં બાલાં નમામિ કુટિલાલકશોભિફાલામ્ ॥ ૬૧॥

ધાત્રી સમસ્તજગતાં દુરિતાબ્ધિયાનપાત્રી સમગ્રનિગમાન્તગિરાં સવિત્રી ।
દાત્રી ત્રિવર્ગવિભવસ્ય દયાસુધાયાઃ પાત્રીકરોતુ હૃદિ માં સુકૃતસ્ય ગોપ્ત્રી ॥ ૬૨॥

અભ્યર્થિતાસિ વિનુતાસિનતાસિ માતરુષ્ટ્રાસિકાંસમવલમ્બ્યનિરીક્ષિતાસિ ।
જાનાસિ મામશરણં ફલદાસિ નૂનં કાલે દયસ્વ સમયાપ્તફલં સખાય ॥ ૬૩॥

નિખિલભુવનરક્ષા દક્ષિણા નેક્ષસે માં
વ્યવહિતનિકટસ્થા ન પ્રલાપં શ◌ૃણોષિ ।
મયિ નનુ કુલદાસે યદ્યુપેક્ષાં કૃષીષ્ટાઃ
ભવતુ મમ હિ ચેતસ્ત્વસ્મૃતિં નૈવ જહ્યાત્ ॥ ૬૪॥

સરસલલિતસૂક્તૈઃ ફુલ્લમલ્લીમતલ્લી

વિગલિતમકરદસ્ફારમાધુર્યસિક્તૈઃ ।
કૃતનુતિરતિવેલં જાતચેતઃપ્રસક્તિઃ
શ્ૃતિવિતતિસવિત્રી શારદાં સંસ્મરામિ ॥ ૬૫॥

ઇતિ કુક્કે. સુબ્રહ્મણ્યશાસ્ત્રીવિરચિતા શારદાસ્તુતિઃ સમ્પૂર્ણા ।

Encoded and proofread by DPD

*shAradAstutiH*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*